1. ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः
   शूर इषवयोऽअतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वाढानड्वानाशुः
   सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः
   पर्जन्यो वर्षतु फलवत्यो न आषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥
2. ईशा वास्यमिदँ सर्वं यत्किञ्च जगत्यां जगत् ।
   तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।।
3. ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
   पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
4. प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
   सच्चित्सुखं परमहंसगतिं तुरीयम् ।
   यत्स्वप्नजागरसुषुप्तिमवैति नित्यं
   तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ॥
5. प्रातर्भजामि मनसा वचसामगम्यं
   वाचो विभान्ति निखिला यदनुग्रहेण ।
   यन्नेतिनेतिवचनैर्निगमा अवोचं_
   स्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥
6. प्रातर्नमामि तमसः परमर्कवर्णं
   पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
   यस्मिन्निदं जगदशेषमशेषमूर्तौ
   रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥
7. समुद्रवसने देवि पर्वतस्तनमण्डले ।
   विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्वमे ॥
8. या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
   या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
   या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा पूजिता
   सा मां पातु सरस्वति भगवती निःशेषजाड्यापहा ॥
9. वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
   निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
10. गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः
    गुरु साक्षात परब्रह्मा तस्मै श्रीगुरवे नमः
11. शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
    विश्वाधारं गगनसदृशं मेघवर्ण शुभाङ्गम् ।

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

12. करचरण कृतं वाक्कायजं कर्मजं वा ।
श्रवणनयनजं वा मानसं वापराधं ।
विहितमविहितं वा सर्वमेतत्क्षमस्व ।
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥

13. न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् |
कामये दुःखतप्तानां प्राणिनाम् आर्तिनाशनम् ||

14. स्वस्तिप्रजाभ्य: परिपालयन्तां न्यायेन मार्गेण महींमहीशाः I
गो ब्राह्मणेभ्य: शुभमस्तु नित्यं लोकासमस्ता सुखिनोभवन्तु II

15. नमस्ते सते ते जगत्कारणाय नमस्ते चिते सर्वलोकाश्रयाय।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय नमो ब्रह्मणे व्यापिने शाश्वताय॥

16. त्वमेकं शरण्यं त्वमेकं वरेण्यं त्वमेकं जगत्पालकं स्वप्रकाशम ।
त्वमेकं जगत्कर्तृपातृप्रहर्तृ त्वमेकं परं निष्कलं निर्विकल्पम॥

17. भयानां भयं भीषणं भीषणानां गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैः पदानां नियन्तृ त्वमेकं परेषां परं रक्षकं रक्षकाणाम् ॥

18. वयं त्वां स्मरामो वयं त्वां भजामो, वयं त्वां जगत्साक्षिरूपं नमामः।
सदेकं निधानं निरालम्बमीशम्, भवाम्भोधि-पोतं शरण्यं व्रजामः।।